साधुर्देवदत्तो मातरं [1]परि । मातरमनु (म.भा. १.४५९) ॥

## प्रसितोत्सुकाभ्यां तृतीया च । (४४/६४१)

प्रसित उत्सुक इत्येताभ्यां योगे तृतीया विभक्तिर्भवति, चकारात् सप्तमी च । प्रसितः प्रसक्तः, यस्तत्र नित्यमेवा[2]वबद्धः स प्रसितशब्देनोच्यते । केशैः प्रसितः, केशेषु प्रसितः । केशैरुत्सुकः, केशेषूत्सुकः ॥

## नक्षत्रे च लुपि । (४५/६४२)

तृतीयासप्तम्यावनुवर्तेते । लुबन्तात्[3] नक्षत्रशब्दात् तृतीयासप्तम्यौ विभक्ती भवतः । पुष्येण (४.२.३, ४/१२०४, १२०५) पायसमश्नीयात्, पुष्ये पायसमश्नीयात् । मघाभिः पललौदनम्, मघासु पललौदनम् । नक्षत्र इति किम् ? पञ्चालेषु (४. २. ६९, ८१/१२८१, १२९३) वसति । लुपि इति किम् ? मघासु ग्रहः । इह कस्मान् न भवति, अद्य पुष्यः, अद्य कृत्तिका (म. भा. १. ४६०) ? अधिकरणे इति वर्तते । वचनं तु पक्षे तृतीयाविधानार्थम् ॥

## प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा । (४६/५३२)

प्रातिपदिकार्थः सत्ता । [4]लिङ्गं स्त्रीलिङ्गपुंलिङ्ग[5]नपुंसकानि । परिमाणं [6]द्रोणः, खारी, आढकम् (म.भा. १. ४६१) । वचनम् [7]एकत्वद्वित्वबहुत्वानि । [8]मात्रशब्दः प्रत्येकमभिसम्बध्यते । [9]प्रातिपदिकार्थमात्रे, लिङ्गमात्रे, परिमाणमात्रे, वचनमात्रे प्रथमा विभक्तिर्भवति । [10]प्रातिपदिकार्थमात्रे — उच्चैः । नीचैः । लिङ्गग्रहणं किम् ? कुमारी, वृक्षः, कुण्डम् (म. भा. १. ४६१) इत्यत्रापि यथा स्यात् । परिमाणग्रहणं किम् ? द्रोणः, खारी, आढकम् इत्यत्रापि यथा स्यात् । वचनग्रहणं किम् ? एकत्वादिषूक्तेष्वपि यथा स्यात् । एकः, द्वौ, बहवः (म. भा. १.४६१) । प्रातिपदिकग्रहणं किम्? निपातस्यानर्थकस्य [11]प्रातिपदिकत्वमुक्तं, ततोऽपि यथा स्यात् । प्रलम्बते । अध्यागच्छति ॥

## सम्बोधने च । (४७/५३३)

आभिमुख्यकरणं सम्बोधनं, तदधिके प्रातिपदिकार्थे प्रथमा न प्राप्नोति इति [12]वचनमारभ्यते । [13]सम्बोधने च प्रथमा विभक्तिर्भवति । [14]हे देवदत्त । हे देवदत्तौ । हे देवदत्ताः ॥

## साऽऽमन्त्रितम् । (४८/४११)

सम्बोधने या प्रथमा[15] तदन्तं [16]शब्दरूपम् आमन्त्रितसञ्ज्ञं भवति । तथा चैवोदाहृतम् । आमन्त्रित-प्रदेशाः — '[17]आमन्त्रितं पूर्वमविद्यमानवत्' (८. १. ७२/४१२) इत्येवमादयः ॥

---

1. प्रति फ. 2. एव नास्ति फ, सम्वद्धः क, निबद्धः इ. 3. च इत्यधिकम् क. 4. लिङ्गं ब. 5. °नपुंसकम् ड. ग. 6. प्रस्थादि क. ड. इ. फ. 7. एकत्वादि ड. इ. 8. वाक्यमिदं नास्ति क. ड. इ. 9. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे क. फ. 10. प्रातिपादिकार्थः ड, प्रातिपदिकार्थे तावत् ह. 11. प्रातिपदिकसञ्ज्ञा उक्ता ह. 12. इदं क.ड, वचनमिदं इ. 13. संबोधनार्थे ह. 14. सम्बोधनाभिव्यक्तये केचिद् हेशब्दं प्रयुञ्जते इत्यधिकम् क. 15. विहिता इत्यधिकम् क.ड. 16. शब्दरूपम् नास्ति क. 17. आमन्त्रितस्य च इत्यधिकम् इ.फ.ह.